# सुभाषचन्द्रवसुः

[आधुनिक भारत के निर्माण में तथा शताब्दियों से सुप्त भारतीय जनता को स्वतन्त्रता प्राप्ति के लिए उत्साहित करने में नेताजी सुभाषचन्द्र बोस (वसु) का नाम स्वर्णाक्षरों में अंकित है। उन्होंने स्वाधीनता-प्राप्ति के लिए सैन्य-संगठन पर बहुत बल दिया तथा विदेश में 'आजाद हिन्द फौज' (Indian National Army) की स्थापना की। उनका प्रसिद्ध उद्‌बोधन था-तुम मुझे खून दो, मैं तुम्हें आजादी दूँगा। ओडिशा के कटक में 1897 ई. में जन्म लेनेवाले सुभाषचन्द्र वसु ने भारतीय प्रशासनिक सेवा की सर्वोच्च परीक्षा में उत्तीर्णता प्राप्त करके भी जन्मभूमि की सेवा के लिए उससे त्यागपत्र दे दिया था। विदेशों में रहकर इन्होंने भारतीय स्वतन्त्रता के लिए अनुपम कार्य किया था। 1945 ई. में विमान दुर्घटना में इनका देहावसान कहा जाता है किंतु कुछ लोगों को इस पर विश्वास नहीं। स्वतन्त्रता सेनानियों में एक पृथक् धारा के नेता होने से 'नेताजी' का विरुद केवल इन्हें ही प्राप्त है।]



भारतीयस्वाधीनतासंग्रामे सुभाषचन्द्रवसोः स्थानं नूनमनुपमं विद्यते। स तदानीन्तनस्य सत्याग्रहमार्गस्य परित्यागेन राष्ट्रवादिनं मार्गं शस्त्रधारणपरं स्वीकृतवान्। तस्य जन्म अधिवक्तुः जानकीनाथवसोः पुत्ररूपेण 23 जनवरी 1897 ई. वर्षे कटकनगरे बभूव। आरम्भतः एव मेधावी छात्रः सुभाषचन्द्रः राष्ट्रभक्तः आसीत्। अतएव कोलकातानगरे

प्रेसीडेन्सीकॉलेजे अधीयान: आंग्लाध्यापकम् ओटेनमहोदयं भारतस्य निन्दकं प्रताडितवान्, तस्माच्च संस्थानात् निष्कासितः। तदनु स्काटिशचर्चकालेजेऽधीयानः स कलकत्ता विश्वविद्यालयतः 1918 ई. वर्षे बी.ए. परीक्षामुत्तीर्णः। 1919 ई. वर्षे कैम्ब्रिज विश्वविद्यालयेऽधीयानः स भारतीयप्रशासनसेवायां (I.C.S) चतुर्थं स्थानं लब्धवान्।

भारतभूमिं सेवितुकामः तस्याः सेवायाः स त्यागमकरोत्। स्वराज–नामकस्य पत्रस्य सम्पादने निरतः स प्रान्तीयकांग्रेससमितेः प्रचाराधिकारी जातः। 1923 ई. वर्षे सुभाषचन्द्रः अखिलभारतीयस्य युवाकांग्रेसस्य अध्यक्षः बभूव। 1925 ई. वर्षे राष्ट्रवादितया स बन्दीकृतः, माण्डले कारागारे निबद्धः यत्र क्षयरोगेण आक्रान्तोऽपि जातः। वर्षद्वयानन्तरं स कारागारान्मुक्तः कांग्रेसदलस्य सचिवो जातः। 1930 ई० वर्षे स कोलकातानगरनिगमस्य महापौरः (मेयर) जातः। 1939 ई. वर्षे स अखिलभारतीयकांग्रेसदलस्य अध्यक्षः निर्वाचितः। किन्तु मुख्यधारया सह विवादेन त्यागपत्रमसौ दत्तवान्।

ततः सुभाषचन्द्रः 1939 ई. वर्षे (22 जून दिवसे) "ऑल इण्डिया फार्वर्ड ब्लॉक" इति संस्थायाः स्थापनं कृतवान्। 1941 ई. वर्षे गृहे एवं बन्दीभूतः सुभाषः प्रच्छन्नरूपेण निर्गतः। अफगानिस्तानादि देशान् अतीत्य स जर्मनीराजधानीं गतः यत्र विश्वयुद्धस्य प्रतिनेतुः हिटलरस्य सान्निध्यं प्राप्तः। कालान्तरेण जापानदेशेन सह मैत्रीं प्राप्य स सिंगापुरं गतः यत्र आजादहिन्दफौजनामकस्य सैन्यसंघटनस्य स्थापनां कृतवान्। बहवः भारतीयसैनिकाः तस्य संघटने आगताः ब्रिटिशसैनिकैः सह युद्धं कृतवन्तः। अनेनैव क्रमेण विश्वयुद्धसमाप्तिकाले 18 अगस्त दिवसे 1945 ई. वर्षे सुभाषचन्द्रस्य विमान-दुर्घटनायां निधनं जातम्। अद्यापि केचन जनाः दुर्घटनायां तस्य निधने न विश्वसन्ति। 1992 ई. वर्षे सुभाषचन्द्रः मरणोत्तरं "भारतरत्नम्" इत्युपाधिना अलंकृतः। वस्तुतः स्वकीयस्य विशिष्टस्य राजनीतिदर्शनस्य कृते सुभाषचन्द्रः महत्त्वं लभते।

**शब्दार्थाः –**

| | | |
|---|---|---|
| स्वाधीनतासंग्रामे | = | स्वाधीनता की लड़ाई में |
| नूनमनुपमम् | = | (नूनम् + अनुपमम्) निश्चित रूप से अनुपम |
| विद्यते | = | विद्यमान है |
| तदानीन्तनस्य | = | उस समय का |
| सत्याग्रहमार्गस्य | = | सत्याग्रह के रास्ते का |
| परित्यागेन | = | छोड़ देने से |
| शस्त्रधारणपरम् | = | शस्त्र उठाने का, हिंसा का |
| स्वीकृतवान् | = | स्वीकार किया |
| अधिवक्तुः | = | अधिवक्ता का, वकील का |
| बभूव | = | हुआ (भू + लिट् लकार) |
| आरम्भतः | = | आरम्भ से |
| अधीयानः | = | अध्ययन करते हुए (अधि + इङ् + शानच्) |
| आंग्लाध्यापकम् | = | अंग्रेज अध्यापक को |
| प्रताडितवान् | = | पीटा, अपमानित किया |
| तस्माच्च | = | (तस्मात्+च) और उसके कारण |
| निष्कासितः | = | निष्कासित हुआ / निकाला गया |
| स्काटिशचर्चकालेजे | = | स्काटिश चर्च कालेज में |
| लब्धवान् | = | प्राप्त किया |
| सेवितुकामः | = | सेवा करने की इच्छा रखनेवाला |

| | | |
|---|---|---|
| निरतः | = | संलग्न, लगा हुआ |
| प्रान्तीयकांग्रेससमितेः | = | प्रान्तीय कांग्रेस समिति का |
| राष्ट्रवादितया | = | राष्ट्रवादी होने के कारण |
| बन्दीकृतः | = | बंदी बनाया गया/बनाये गये |
| निबद्धः | = | बाँधा गया, रखा गया/रखे गये |
| क्षयरोगेण | = | क्षयरोग (टी. बी.) से |
| आक्रान्तोऽपि | = | आक्रान्त (ग्रस्त) होकर भी |
| जातः | = | हुआ/हुए |
| वर्षद्वयानन्तरम् | = | दो वर्ष बाद |
| कारागारान्मुक्तः | = | कारागार (जेल) से मुक्त |
| दत्तवान् | = | दिया |
| प्रच्छन्नैरूपेण | = | छिपे रूप में, वेष बदल कर |
| निर्गतः | = | निकल गया/गये |
| अतीत्य | = | पार कर के |
| प्रतिनेतुः | = | विरोधी नेता का |
| सान्निध्यम् | = | समीपता, निकटता, उपस्थिति |
| कालान्तरेण | = | दूसरे समय में, कालक्रम से |
| संघटने | = | संगठन (प्रबन्धन) में |
| कृतवन्तः | = | (उन्होंने) किया |
| अनेनैव (अनेन + एव) | = | इसी से |
| मरणोत्तरम् | = | मरने के बाद |

| | | |
|---|---|---|
| अलंकृतः | = | विभूषित किया गया/ किये गये |
| स्वकीयस्य | = | अपना |
| विशिष्टस्य | = | विशेष, दूसरों से अलग |
| लभते | = | पाता है |

**सन्धिविच्छेदः –**

| | | |
|---|---|---|
| स्वाधीनता | = | स्व+अधीनता (दीर्घ-सन्धि) |
| सत्याग्रहः | = | सत्य+आग्रहः (दीर्घ-सन्धि) |
| आंग्लाध्यापकम् | = | आंग्ल+अध्यापकम् (दीर्घ-सन्धि) |
| तस्माच्च | = | तस्मात्+च (व्यञ्जनसन्धि) |
| प्रचाराधिकारी | = | प्रचार+अधिकारी (दीर्घ-सन्धि) |
| वर्षद्वयानन्तरम् | = | वर्षद्वय+ अनन्तरम् (दीर्घ-सन्धि) |
| कारागारान्मुक्तः | = | कारागारात्+मुक्तः (व्यञ्जनसन्धि) |
| अनेनैव | = | अनेन+एव (वृद्धि सन्धि) |
| अद्यापि | = | अद्य+अपि (दीर्घ-सन्धि) |
| इत्युपाधिना | = | इति+उपाधिना (यण् सन्धि) |

**प्रकृति-प्रत्यय विभागः –**

| | | |
|---|---|---|
| विद्यते | = | √विद्, लट् लकार प्रथम पुरुष, एकवचन, आत्मनेपदी |
| कृतवान् | = | √कृ + क्तवतु |
| बभूव | = | √भू, लिट् लकार, प्र. पु., एकवचन |
| अधीयानः | = | अधि+ √इ + शानच् |
| प्रताडितवान् | = | प्र + √ताड +क्तवतु |

| | | |
|---|---|---|
| लब्धवान् | = | √लभ् + क्तवतु |
| निरतः | = | नि + √रम् + क्त |
| निबद्धः | = | नि + √बन्ध् + क्त |
| अतीत्य | = | अति+ √इ + ल्यप् |
| प्रतिनेतुः | = | प्रति + √नी + तृच् षष्ठी, एकवचन |
| लभते | = | √लभ् , लट् लकार, प्र. पु., एकवचन, आत्मनेपदी |
| कृतवन्तः | = | √कृ + क्तवतु प्रथमा, बहुवचन (पुं.) |

## अभ्यासः

### (मौखिकः)

1. **एकपदेन उत्तरं वदत–**

   (क) सुभाषचन्द्रवसोः जन्म कदा अभवत् ?

   (ख) सुभाषचन्द्रवसोः जन्म कुत्र अभवत् ?

   (ग) सुभाषचन्द्रवसुः कस्मात् कॉलेजात् निष्कासितः ?

   (घ) सुभाषचन्द्रवसुः कस्मिन् वर्षे भारतीयप्रशासनसेवायां चितः ?

   (ङ) सः कदा अखिलभारतीयकांग्रेसदलस्य अध्यक्षः निर्वाचितः ?

2. **अधोलिखितानां पदानां प्रत्ययं वदत–**

   कृतवान्, लब्धवान्, प्राप्तवान्, जातः, प्राप्तः, आगम्य, दृष्ट्वा, गन्तुम् ।

3. **अधोलिखितानां पदानां विभक्तिं वदत–**

   संग्रामे, मार्गस्य, तस्मात्, देशम्, सेवायाः, कारागारे, कांग्रेसस्य, वर्षे ।

**4. निम्नाङ्कितेसु क्रियापदेषु कः धातुः कः च पुरुषः इति वदत –**

अभवत्, आसीत्, पश्यामः, कथ्यते, पठतु, गच्छानि ।

## (लिखितः)

**1. एकपदेन उत्तरत –**

(क) सुभाषस्य जन्म कुत्र अभवत् ?

(ख) स कुत्र आजादहिन्दफौजनामकस्य सैन्यसंघटनस्य स्थापनां कृतवान् ?

(ग) सुभाषचन्द्राय कदा भारतरत्नं दत्तम् ?

(घ) सुभाषः कस्मिन् वर्षे कोलकातानगरनिगमस्य महापौरः जातः ।

(ङ) कस्मिन् वर्षे गृहे एव सुभाषः बन्दीभूतः जातः ?

**2. रिक्तस्थानानि पूरयत–**

(क) सः .......... वर्षे बी. ए. परीक्षामुत्तीर्णः ।

(ख) ............... नगरे सुभाषस्य जन्म अभवत् ।

(ग) ................. वर्षे गृहात् प्रच्छन्नरूपेण निर्गतः ।

(घ) हिटलरस्य .............. प्राप्तः ।

(ङ) सुभाषचन्द्रस्य ............. निधनं जातम् ।

3. सुमेलनं कुरुत–

| 'अ' | 'आ' |
|---|---|
| (क) सुभाषस्य जन्म | (i) 1992 |
| (ख) बी. ए. उत्तीर्णः सुभाषः | (ii) 1945 |
| (ग) सुभाषस्य युवाकांग्रेसस्य अध्यक्षतालाभः | (iii) 1897 |
| (घ) सुभाषस्य विमान-दुर्धटनायां निधनम् | (iv) 1923 |
| (ङ) सुभाषस्य मरणानन्तरं भारतरत्नोपाधिः | (v) 1918 |

4. अधोलिखितेषु रेखांकितपदेषु विभक्तिं लिखत –

(क) तस्य जन्म कटकनगरे बभूव।

(ख) स माण्डले कारागारे निबद्धः।

(ग) सः सत्याग्रहमार्गं परित्यक्तवान्।

(घ) सुभाषचन्द्रः "ऑल इण्डिया फॉर्वर्ड ब्लॉक" इति संस्थायाः स्थापनं कृतवान्।

(ङ) तस्मात् संस्थानात् निष्कासितः।

5. वाक्यप्रयोगं कुरुत–

अपि, एव, तस्याः, सह, अतएव, तत्र, कुत्र, च

6. अधोलिखितेषु क्रियापदेषु लकारं, पुरुषं, वचनं च लिखत :

| क्रियापदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|
| आसीत् | | | |
| अकरोत् | | | |
| लभते | | | |
विद्यते | | | |
| भविष्यति | | | |

## योग्यताविस्तारः

1947 ई. में भारत अंग्रेजों की पराधीनता से मुक्त हुआ। आज की पीढ़ी इतिहास में पढ़ना पड़ता है कि स्वाधीनता के लिए भारत के निवासियों को कितना सं करना पड़ा था। एक प्रकार से 1857 में ही स्वतंत्रता-संग्राम के लिए भारतीयों ने श धारण किया था किंतु असंगठित संघर्ष के कारण वह संग्राम असफल हो गया। कां की स्थापना (1885 ई.) के बाद स्वतंत्रता के लिए संघर्ष एक संगठित रूप में होने लग इसमें भी क्रमशः दो दल हो गए जिन्हें "गरम दल" और "नरम दल" कहा जाता बालगंगाधर तिलक गरम दल के नेता थे जबकि मोतीलाल नेहरू आदि नरम दल पक्षधर थे। महात्मा गाँधी के स्वतंत्रता-संग्राम में कूदने पर असहयोग आन्दो (1921 ई.) आरम्भ हुआ। उन्होंने सविनय अवज्ञा, सत्याग्रह और अहिंसा पर बल वि जिसे भारतीय राष्ट्रीय कांग्रेस ने स्वीकार कर लिया किंतु इस सिद्धान्त के भी विरोधी द कांग्रेस में वर्तमान थे। उन्होंने राष्ट्रवाद की उद्‌घोषणा करते हुए तत्काल स्वाधीनता मांग रखी,चाहे हिंसा का ही मार्ग पकड़ना पड़े। अंग्रेजों की दमनात्मक नीति का परिणाम होना था। ऐसे क्रान्तिकारियों में सरदार भगत सिंह, चन्द्रशेखर आजाद, राज आदि प्रमुख युवक थे। उन्हें अंग्रेजों ने बलपूर्वक समाप्त किया।

नेताजी सुभाषचन्द्र बोस यद्यपि कांग्रेस के नेता थे किन्तु अपने राष्ट्रवाद के क महात्मा गाँधी जैसे नेताओं से मतभेद रखते थे। कांग्रेस के एक अधिवेशन में मह गाँधी द्वारा समर्थित प्रत्याशी को निर्वाचन में हरा कर वे स्वयं अध्यक्ष पद पर चुने ग तदनन्तर उन्होंने द्वितीय विश्वयुद्ध के समय अंग्रेजों के विरुद्ध संघर्ष करते हुए विदेश सैन्य संगठन किया। यद्यपि उनका स्वतंत्र राजनीतिक दर्शन था किंतु उनके अनुय भारतीयों ने उन्हें ''नेताजी'' का प्रतिष्ठित विरुद्ध (उपाधि) प्रदान किया।

◆◆◆